(1081) " प्ली गतौ " (IX-क्र्यादिः-1503. सक. अनि. पर.)

प्वादिः, ल्वादिश्च ।

'ल्वी—' इति क्षीरस्वामी पपाठ । '—वरणे' इति इति केचित् । मैत्रेयादयस्त्वमुं न पठन्ति । इति मा. धा. वृत्तावुक्तम् ।

प्लायकः-यिका, प्लायकः-यिका, पिप्लीषकः-षिका, पेप्लीयकः-यिका ;
प्लेता-त्री, प्लाययिता-त्री, पिप्लीषिता-त्री, पेप्लीयिता-त्री ;
[1]प्लिनन्-[A]न्ती, प्लाययन्-न्ती, पिप्लीषन्-न्ती ; —
प्लेष्यन्-न्ती-ती, प्लाययिष्यन्-न्ती-ती, पिप्लीषिष्यन्-न्ती-ती ; —
— प्लाययमानः, प्लाययिष्यमाणः, — पेप्लीयमानः, पेप्लीयिष्यमाणः ;
सुप्लीः-सुप्लियौ-सुप्लियः ; — —
[2]प्लीनम्-प्लीनः-प्लीनवान्, प्लायितः, पिप्लीषितः, पेप्लीयितः-तवान् ;
प्लयः, प्लायः, पिप्लीषुः, पेप्लियः ;
प्लेतव्यम्, प्लाययितव्यम्, पिप्लीषितव्यम्, पेप्लीयितव्यम् ;
प्लयनीयम्, प्लायनीयम्, पिप्लीषणीयम्, पेप्लीयनीयम् ;
प्लेयम्, प्लाय्यम्, पिप्लीष्यम्, पेप्लीय्यम् ;
ईषत्प्लयः-दुष्प्लयः-सुप्लयः ; — —
प्लीयमानः, प्लाय्यमानः, पिप्लीष्यमाणः, पेप्लीय्यमानः ;
प्लयः, प्लायः, पिप्लीषः, पेप्लीयः ;
प्लेतुम्, प्लाययितुम्, पिप्लीषितुम्, पेप्लीयितुम् ;
[3]प्लीनिः, प्लायना, पिप्लीषा, पेप्लीया ;
प्लयनम्, प्लायनम्, पिप्लीषणम्, पेप्लीयनम् ;

---

1. 'क्र्यादिभ्यः' (3-1-81) इति श्ना विकरणप्रत्ययः । 'श्नाऽभ्यस्तयोरातः' (6-4-112) इत्याकारलोपे 'प्वादीनां ह्रस्वः' (7-3-80) इति ह्रस्वे च रूपमेवम् ।
2. 'ल्वादिभ्यः' (8-2-44) इति निष्ठानत्वम् ।
3. 'ऋल्वादिभ्यः क्तिन् निष्ठावद्वाच्यः' (वा. 8-2-44) इति क्तिनस्तकारस्य नकारे रूपमेवम् ।

A. 'पार्श्वे प्लिनन् गजमचोदयदुन्मदान्धमम्लीनशक्तिमतिघोरजवं प्रिनन्तम् ॥' धा. का. 3-8.